শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধিস্বামি কৃতিষু
# ॥ নাৱল্পাকমণিমালা ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ নাৱল্পাকমণিমালা ॥

করিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

সুমশরশতগর্ৱাক্ষেপদক্ষস্ৱৱর্ষ্মা
হিমকরসহজাতাৱাসভূর্যস্য ৱক্ষঃ।
সমকরসরিতস্ততসন্নিধৌ সন্নিৱিষ্টৈঃ
মম করযুগভূতেরঞ্জলেরস্তু লক্ষ্যম্॥ ১ ॥

যথা ক্রতূনাং মহিতোশ্ৱমেধঃ
তথা সুরাণাং মহিতোশ্ৱৱক্ত্রঃ।
ইতীদমালোচ্য হি দেশিকেন্দ্রাঃ
লক্ষ্যং ক্রতূনাং তমিমং ভজন্তি॥ ২ ॥

ভজতাং মধুজিদ্ৱচোৱিলাসং
কলযত্যেষ রমাতুরঙ্গৱক্ত্রঃ।
মধুজিতপদকীর্তিতঃ পুরাণে
তদযং হীতি ভজন্তি দেশিকেন্দ্রাঃ॥ ৩ ॥

সুধাংশুবিম্বস্থিতদিৱ্যদেহং
ৱিধাতৃযোষিদ্বিনতাঙ্ঘ্রিপদ্মম্।
সুধাঝরীতুল্যৱচঃপ্রৱাহৈঃ
তথাৱিধং ধাম ৱিভাতি কিঞ্চিত্॥ ৪ ॥

আকন্ধরমাদিপুমান
উপরি চ গন্ধর্ৱনাথসন্তানঃ।
ইন্ধে কশ্চন হৃদযে
কিং ধাতাপ্যস্তি মামলঙ্কর্তুম্॥ ৫ ॥

জম্বূদ্বীপে ৱিবুধমহিতে শ্রীৱিলাসাস্পদেস্মিন
জম্বূপাকে ৱিবুধমহিতে শ্রীনিৱাসাস্পদেস্মিন্।

www.prapatti.com

জম্বূৰর্ণং ৰপুষি ৰহতসসম্পদৃক্ষেভিজাতঃ
    জম্বূরাগং মনসি চ গুরুসসম্পদে নসসমিন্ধে॥ ৬ ॥

মৃগশিরসি ধরণ্যামুদ্গতো দেশিকেন্দ্রঃ
    মৃগশিরসি কলানামাস্পদে সক্তবুদ্ধিঃ।
মৃগশিরসি হিরণ্যাক্ষেপকেপ্যেষ কুর্যাত
    মৃগশিরসি নিৰেশ্যান্ মাদৃশান্ জ্ঞানপূর্ণান্॥ ৭ ॥

শ্রীরামানুজজন্মর্ক্ষমধ্যর্ক্ষে সম্ভৰন্ গুরুঃ।
আচার্যতাং চ দৈৰত্বমাত্মনো জ্ঞাপযত্যসৌ॥ ৮ ॥

ৰ্যাখ্যাং সারাৰলের্যামতনুত ভগৰান্ সুন্দরার্যো গুরুর্নঃ
    ৰ্যাখ্যাং শ্রীতত্ত্বসারস্য চ গুরুমহিতগ্রন্থরত্নোত্তমস্য।
যোযং সোযং যদীযং পদকমলযুগং মস্তকে সংৰিধত্তে
    নিত্যং তস্মৈ নমস্তাত্ সকলভৰুকভূম্যণ্ণযার্যোত্তমায॥ ৯ ॥

উন্নযামি ৰিনতানিতি হর্ষাত
    অন্নযন্তমমুমণ্ণযমাহুঃ।
এতদানতহযাস্যসেৰিনী
    ভারতীললিতভারতীৰিদঃ॥ ১০ ॥

শ্রীকান্তরামানুজসম্পদৃক্ষং
    শ্রীদান্তরামানুজহৃদ্যমীডে।
ৰেদান্তরামানুজমৌলিৰন্দ্যং
    ৰেদান্তরামানুজপাদসক্তম্॥ ১১ ॥

শ্রীমদ্ভাষ্যসুৰর্ণভূষিততনুং শ্রীৰক্ত্রৰাণীরসৈঃ
    সম্যঙ্মোহিতসর্ৰলোকহৃদযাং শান্তাং চ কান্তাং তথা।
ভূযোভিসসুমনঃ কুলৈরপি ধৃতাং ৰেদান্তরামামহং
    তদ্ভ্রাতুর্গুরুসত্তমস্য সমিতৌ লীলাৰতীং চিন্তযে॥ ১২ ॥

না ৰিল্ রামং মনসি সততং সংৰহন্ সীতযে তং
    নাৰিল্ রামামপি ভগৰতো নাভিপদ্মোত্থিতস্য।
নাৰিল্পাকে ৰিরচিতজনৈঃ সন্মণেসসতসভাযাং
    না ৰিল্লূরান্ ইতি কৃতিমুদে কিঞ্চন ৰ্যাজহার॥ ১৩ ॥

www.prapatti.com

॥ ইতি নাৰল্লাকমণিমালা সমাপ্তা ॥

www.prapatti.com